ISSN: 0474-9030

Vol-67-Issue-5-September-2019

# स्मृत्यनुसारेण राष्ट्रनायकस्य गुणाः

**क्लदीप सिंह**

**शोधच्छात्रः, धर्मशास्त्रविभागः,**

**श्रीलालबहादुरशास्त्रोराष्ट्रिय–**

**संस्कृतविद्यापीठम्, नवदेहली–16**

राजा शब्दस्य निष्पत्तिः राजृ दीप्तौ इति धतुतः वर्तते। यस्यार्थो भवति प्रकाशवान् इति। ऋग्वेदे बहुषु स्थलेषु राजशब्दस्य प्रयोगो वर्तते, राजशब्दः मित्रावरुणयोः कृते प्रयुक्तो वर्तते यथा –

''ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।

ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्र धरयतां ध्रुवम्।।[1]''

तैत्तिरीयसंहितायां प्रतिपादितं वर्तते यत् मनुष्यः राज्ञा पालितः नियन्त्रितश्च भवतीति। यथा – ''तस्माद्राज्ञा मनुष्या विधृताः''[2] इति। तथैव निरुक्तकारेणापि राजशब्दः राज्धातुतः निष्पादितो वर्तते, यस्यार्थो भवति प्रकाशवान् इति वर्तते। महाभारते तु राजा इति शब्दस्य निष्पत्तिः रंजधातुतः भवति यस्यार्थो भवति प्रसन्नकरणम्, अर्थात् स एव राजा भवति यः प्रजाभ्यः सुखं दातुं समर्थो भवतीति प्रतिपादितं वर्तते। यथा –

''रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते।[3]''

---

[1] **ऋग्वेदः 10.173.5**

[2] **तैत्तिरीयसंहिता 1.8.10.2**

[3] **महाभारतम्, शा.पर्वः 59.127**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

मनुना निगदितं यत् समाजे कश्मिंश्चित्समये यदा राजा नासीत् तदा तस्याभावे समाजेऽन्यायात्याचारदुराचारा अत्यधिकरूपेण वर्धिताः, सबलजनानां साम्राज्यमासीत्, दुर्बलास्तु भयव्याकुलाः जाताः, अत्याचारनिवारणाय किमपि नियमादिकं नासीत्, दुराचारयुक्तानां भयात् व्याकुलः सन्तः प्रजाः इतस्ततः पलायिताः। तस्मिन् समये ईश्वरेण सम्पूर्णजगतः रक्षणार्थं राज्ञः सृष्टिः विहिता। तथा च भगवता इन्द्रवायुयमसूर्याग्निवरुणचन्द्रमकुबेराणां सारभूतांशमादाय राज्ञः सृष्टिः विहिता इति प्रतिपादयति स्वयमेव मनुः –

''अराजके हि लोकेऽस्मिन्सर्वतो विद्रतो भयात्।

रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः।।

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।

चन्द्राक्तिशयोश्चैव मात्रा निर्हृत्य शाश्वतीः।।[4]''

राज्ञ उत्पत्त्यनन्तरं दुष्टानां स्वनियन्त्रणे स्थापनाय, समाजे सुव्यवस्था–स्थापनाय च राज्ञः केनापि अवहेलना न कर्तव्या, यदि अवहेलना क्रियते चेत् यथा अग्निः केवलं स्पर्शे सति व्यक्तेरेव नाशं करोति परं नृपरूपाग्निस्तु व्यक्तेः, तस्य पशोः, धनस्य, कुलस्य च नाशं करोतीति स्वयमेव प्रतिपादयति मनुः –

''एकमेव हदत्यग्निर्नरं दुरुपसर्पिणम्।

कुलं दहति राजाग्निः सपशुद्रव्यसंचयम्।।[5]''

तथैव याज्ञवल्क्यानुसारं राजा अत्यधिकोत्साही, दानशीलः, कृतज्ञः, वृद्धजनानां सेवास्वभावः, विनम्रः, सुखदुःखयोः समानव्यवहारशाली, सत्यवादी,

---

[4] **मनुस्मृतिः 7.3–4**
[5] **मनुस्मृतिः 7.9**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

पवित्रः, अदीर्घसूत्री, वीरः, रहस्यज्ञानवान्, आत्मविद्यावान्, योगक्षेमवान्, कृष्यादिविद्यानां ज्ञाता इति एतादृशगुणसम्पन्नो भवेदिति प्रतिपादयति यथा –

''महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः।

विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक्शुचिः।।

अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपुरुषस्तथा।

धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्।।

स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च।

विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः।।[6]''

नृपस्योत्पत्तौ बहूनामपि शक्तीनां हस्त आसीत्, इन्द्रवायुयमसूर्याग्निवरुण–चन्द्रमकुबेरानामंशमादाय नृपः प्रादुर्भूतः। एवंप्रकारकोपमादि प्रदाय नृपं सम्मानितस्थाने स्थाप्यते स्म, संसारस्य जनाः नृपं दृष्ट्वा आनन्दिताः, शक्तिशालिनः भयभीताः, निर्बलास्तु प्रसन्नाः जाताः। नृपस्य महत्ववर्णने स्पष्टरूपेण निगदितं यत् यद्यपि नृपो बालकोऽस्ति चेदपि स मनुष्यः नास्ति, तस्य बालकस्य शरीरे साक्षादीश्वर एवास्ति, नृपस्य समीपे भाग्यस्य विजयस्य च देवताः निवसन्ति एवं नृपस्य क्रोधे यमस्य मृत्योश्च निवासो भवति। राजा देवानां नित्यांशेन निर्मितत्वात् स्वप्रभावेण अग्निवायुसूर्यचन्द्रधर्मराजकुबेर– महेन्द्रादिरूपं धर्तुं शक्नोति। प्रतिपादयत्यपि स्वयमेव मनुस्मृतिः यथा –

''सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः धर्मराट्।

स कुबेरः स वरुणः स महेन्द्रः प्रभावतः।।

[6] **याज्ञवल्क्यस्मृतिः, आचाराध्यायः, राजधर्मः 309–311**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।

महती देवता ह्येषा नररूपेण तिष्ठति।।

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।

मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः।।[7]''

एवमेव कौटिल्यार्थशास्त्रानुसारं प्रजायाः सुख एव राज्ञोऽपि सुखमस्ति, प्रजानां हिते नृपस्यापि हितमस्ति इति प्रतिपादितं यथा –

''राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम्।

दक्षिणा वृत्तिसाम्यं च दीक्षितस्याभिषेचनम्।।

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।

नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम्।।[8]''

राजा स्वविशेषगुणस्य कारणेनैव साधरणमानवापेक्षया प्रजापालकत्वेन नृपत्वेन च पूजितो भवति। यदा यदा नृपः स्वकर्तव्यभावनातः च्युतः तदा तदा नृपः पदच्युतो भवेदिति कामनया आन्दोलनादिकं जातम्। त एव राजानः सफलाः भवन्ति येषु कतिपयविशिष्टगुणाः सन्ति। जना अपि चिन्तयन्ति यत् तस्य राजा सदैव शास्त्रपरम्परायाः रक्षकः, अस्माकं पालनकर्ता च भवेदिति। यथा ब्राह्मणस्य त्यागः, तपः तथा सात्विकजीवनयापनं परमावश्यकं भवति, तथैव क्षत्रियराज्ञानामपि विशेषगुणा अवाश्यका भवन्ति। ते विशेषगुणाः सन्ति अहंकाराभावः, कार्यकुशलः, ईर्ष्यारहितः, मधुरवाणीयुक्तः, दानशीलः इत्यादयः।

---

[7] **मनुस्मृतिः 7.7–8,11**

[8] **कौटिल्यार्थशास्त्रम् 1.19**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

मनुस्मृत्यनुसारेण नृपः प्रतिदिनं प्रातःकाले उत्थाय विदुषां ब्राह्मणानां च सेवां कुर्यात्, वृद्धानामपि सेवां कुर्यात्, विनयसत्वेऽपि ब्राह्मणैः सह विनयस्य ज्ञानं कुर्यात् यतो हि विनययुक्तो राजा कदापि न नश्यति, अविनयस्य कारणेनैव वेननहुषादयो राजानः नष्टा इति तदाह मनुस्मृतिः –

''ब्राह्मणान्पर्युपासीत प्रातरुत्थाय पार्थिवः।

त्रैविधवृद्धान्विदुषस्तिष्टेत्तेषां च शासने।।

वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन्।

वृद्धसेवी हि सततं रक्षोऽभिरपि पूज्यते।।

तेभ्योऽधिगच्छेद्विनयं विनतात्मापि नित्यशः।

विनीतात्मा हि नृपतीन् विनश्यति कर्हिचित्।।

बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।

वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे।।

वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः।

सुदाः पैजवनश्चैव सुमुखो निमिरेव च।।[9]''

नृपः सर्वदा इन्द्रियाणां जयने प्रयत्नशीलो भवेत्, यतो हि जितेन्द्रियो राजा एव प्रजां स्ववशे स्थापयितुं समर्थो भवति। नृपेण कामादुत्पन्नानां दशव्यसनानां, क्रोधादुत्पन्नानाम् अष्टव्यसनानां च त्यागो विधातव्यः, कारणं त्वेतदस्ति यत् कामव्यसनयुक्तो नृपो धर्मभ्रष्टो भवति, तथैव क्रोधव्यसनयुक्तो राजा आत्मभ्रष्टो भवति, अर्थात्स्वयमेव नश्यति। कामादुत्पन्नस्य व्यसनस्य नामानि तु एतानि

[9] **मनुस्मृतिः 7.37–41**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

सन्ति– मृगहरणम्, द्युतक्रीडा, दिवास्वप्नः, परपुरुषनिन्दा, स्त्रीषु अत्यासक्तिः, मद्यपानम्, नृत्ये आसक्तिः, निष्प्रयोजनं भ्रमणम् इति। तथैव क्रोधादुत्पन्नस्य व्यसनस्य अष्टौ नामानि तु एतानि सन्ति – पैशुन्यम्, दुस्साहसम्, द्रोहः, ईर्ष्या, असूया, धनहरणम्, कठोरवचनम्, कठोरदण्डः इति। तदाह मनुस्मृतिकारः स्वयमेव मनुस्मृतिग्रन्थे –

''मृगयाऽक्षो दिवास्वप्नः परिवादः स्त्रियो मदः।
तौर्यत्रिकं वृथाटया च कामजो दशको गणः।।
पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाथ दूषणम्।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः।।[10]''

एवमेव नृपस्य गुणा अन्तरंगबहिरंगरूपेण द्विधा विभक्ताः सन्ति, मनुना बहिरंगगुणानां वर्णनमेवंप्रकारेण विहितं यत् नृपः स्वराष्ट्रे न्यायानुसारेण दण्डस्य प्रयोगं कुर्यात्, शत्रुषु कठोरदण्डः, प्रियमित्रेषु तु सरलव्यवहारः तथा ब्राह्मणेषु तु क्षमायाः व्यवहारं कुर्यात्। तदाह –

''स्वराष्ट्रं न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः।।[11]''

याज्ञवल्क्येन बहिरंगगुणा एवंरीत्या प्रोक्ताः यथा मन्त्रिणां चयनम्, पुरोहितचयनम्, याजकचयनम्, योग्यब्राह्मणाय दानं रक्षा इत्यादय इति। तदेवाह याज्ञवल्क्यस्मृतौ –

''स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन्।

---

[10] **मनुस्मृतिः 7.47–48**
[11] **मनुस्मृतिः 7.32**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

तैः सार्धं चिन्तयेद्राज्यं विप्रेणाऽर्थं ततः स्वयम्।।[12]''

कौटिल्येन नृपस्य गुणानां सूची विस्तरेण वर्णिता वर्तते। तत्र सर्वप्रथमम् एतादृशगुणानां वर्णनं वर्तते येन नृपः प्रजानां हृदयस्य जयं कर्तुं शक्नोति यथा – कुलीनता, धर्मपरायणता, प्रफुल्लता, श्रेष्ठजनानां सम्मानप्रवृत्तिः, सदाचारिता, सत्यवादिता, वचनबद्धता, कृतज्ञता, विशालचित्तता, उत्साहः, अप्रमादः, दृढ़संकल्पता, स्वानुशासनप्रियता इत्यादयः। नृपस्य बुद्धिविषयकाः गुणास्तु एते सन्ति ज्ञानस्याभिकांक्षा, वादविवादोपरान्तं सिद्धान्तं प्रति श्रद्धा इति। उत्साहसम्बन्धिगुणास्तु पराक्रमः, परपराक्रमे असहिष्णुता, कार्यचपलता एवं उद्योगशीलः इति। एतेषां गुणानां निरूपणानन्तरं कौटिल्येन नृपस्य आत्मसम्पद्गुणानां चर्चा विहिता।

गौतमानुसारं नृपेण शास्त्रविहितानि कार्याणि कर्तव्यानि, सत्ययुक्तनिर्णय एव प्रदेयः, अन्तः पवित्रं बाह्यं च पवित्रं भवेत्, इन्द्रियाः स्ववशे स्युः, सेवका अपि समीचीनाः स्युः, प्रजाभिः सह व्यवहारो भेदभावपूर्वकं विधातव्यः, प्रजायाः कल्याणं सदैव कर्तव्यमिति। तदाह गौतमधर्मसूत्रे – ''शुचिर्जितेन्द्रियो गुणवत्सहायोपायसम्पन्नः। समः प्रजासु स्यात्। हितमांस कुर्वीत[13]'' इति। तथैव महाभारते शान्तिपर्वणि नृपस्य षट्त्रिंशद्गुणाः प्रोक्ताः तेषु हठाभावः, धर्मनिष्ठः, प्रियवादी इत्यादयः गुणाः प्रमुखाः सन्ति। यथा –

''इयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसंयुता।

यान्गुणास्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात्।।[14]''

---

[12] **याज्ञवल्क्यस्मृतिः 1.312**

[13] **गौतमधर्मसूत्रम् 1.2.4–6**

[14] **महाभारतम्, शान्तिपर्वः, 71.2**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

कामन्दकेन स्वनीतिसारग्रन्थे एकोनविंशतिः गुणाः प्रोक्ताः, यथा – दण्डनीतेः अध्ययनम्, मेधा, गम्भीरता, चातुर्यम्, साहसिकता, ग्रहणसामर्थ्यम्, क्षमता, वाग्विदग्धता, दृढ़ता, आपत्काले सहिष्णुता, प्रभविष्णुता, पवित्रता, दयालुता, सत्यवादिता, कृतज्ञता, कुलीनता, चारित्र्यम्, आत्मनिग्रहश्च इति। तत्र लिखितमपि यत् नृपे दानशीलता, सत्यवादिता, पराक्रम इति एतादृशगुणाः सन्ति ये अन्यगुणप्राप्तये सहायकाः भवन्ति। तदाह –

''शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता।
उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता।।
प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता।
श्रुतं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः।।[15]''

तथैव शुक्रनीत्यनुसारं पिता, माता, गुरुः, भ्राता, बन्धुः, कुबेरः, यम इति सप्तगुणयुक्तो राजा भवतीति स्वीकृतं वर्तते। तदाह तत्रत्यश्लोकः –

''पिता माता गुरुः भ्राता बन्धुर्वैश्रवणो यमः।
नित्यं सप्तगुणैरेषां युक्तो राजा न चान्यथा।।[16]''

तथैव सर्वप्रथमं राजा स्वात्मानं विनययुक्तं कुर्यात्, तदनन्तरं स्वपुत्रम्, तदनु च स्वामात्यम्, तदनन्तरं सेवकम्, अन्ते च प्रजां विनययुक्तं कुर्यादित्याह –

''आत्मानं प्रथमं राजा विनयेनोपपादयेत्।
ततः पुत्रांस्ततोऽमात्यांस्ततो भृत्यांस्ततः प्रजा।।[17]''

---

[15] **कामन्दकीयनीतिसारः 1.21–22**

[16] **शुक्रनीतिः 1.77**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

नृपस्य अनेकानि रूपाणि द्रष्टुं शक्यन्ते, यदा सः प्रजानां भरणं पोषणं च करोति तदा स मातृरूपेण पितृरूपेण च भवति, यदा उपदिशति अथवा सत्यपथे दिग्दर्शनं करोति तदा सः गुरुः भवति, यदा सहायकरूपेण भवति तदा सः भ्रातृरूपेण बन्धुरूपेण च भवति, यदा मुक्तहस्तेन धनं वितरति तदा स कुबेरो भवति, यदा स शासनस्य सुव्यवस्थां करोति, अथ च नियमस्य सुरक्षार्थं दण्डं प्रददाति तदा सो यमराजो भवति। अनेन प्रकारेण एकस्मिन् एव राज्ञि अनेके गुणाः सम्भवन्ति।

राष्ट्रे शान्तिस्थापना सुरक्षास्थापना च नृपस्य प्रमुखं कर्तव्यमस्ति। प्रशासनस्य सर्वा अपि योजनाः सुरक्षायाः कृते एव वर्तते। नृपस्य प्रत्येकं कार्ये, कर्तव्ये, धर्मे, विचारे च प्रजाहितस्य भावना व्याप्ता भवति। नृपस्य सम्पूर्णमपि जीवनं राष्ट्रस्य हितार्थमेव भवति। प्रजाया अर्थव्यवस्था सुदृढ़ो भवेदिति धिया तस्य धनस्य सुरक्षा अपि राज्ञा एव कर्तव्या, प्रजाया रक्षार्थं यदा कदा युद्धमपि अनिवार्यरूपेण कर्तव्यं भवति। आक्रमणे सति युद्धात्पलायनं महापापम्, कर्तव्यहीनता च भवति तदाह मनुस्मृतिकारः –

''समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः।
न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्।।
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम्।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्।।[18]''

---

[17] **शुक्रनीतिः 1.92**
[18] **मनुस्मृतिः 7.87–88**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

राष्ट्रे शान्तेः वातावरणं तावत्पर्यन्तमेव सम्भवति यावत्पर्यन्तं नृपस्य प्रभुत्वं भवति। अत एव एतदपि आवश्यकं भवति यत् राजा स्वदुर्गुणं कदापि प्रजायाः समक्षं सेवकानां समक्षं च नानयेत्। राज्ञा स्वदोषस्यावरणं तथैव कर्तव्यं यथा कच्छपः स्वशरीरस्य अंगानामावरणं करोति। तदाह मनुस्मृतौ –

''नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु।

गृहेत्कर्म इवांगानि रक्षेद्विवरमात्मनः।।[19]''

नृपो धार्मिकपरम्पराणां पोषकोऽपि भवेत्, परन्तु अन्यधर्माणां रक्षाऽपि नृपस्य प्रमुखं कर्तव्यं वर्तते। साम्प्रदायिकभावनातः पोषितानां गतिविधीनां मूलोच्छेदनमेव राष्ट्रस्य कल्याणाय भवति। मनुना स्पष्टरूपेण प्रतिपादितं यत् नृपस्य कार्यसिद्धये भगवता सम्पूर्णप्राणिनां रक्षकस्य ब्रह्मतेजोमयस्वरूपस्य पुत्रस्य दण्डस्य सृष्टिः विहिता इति तदाह मनुः –

''तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।

ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः।।[20]''

एतत्तु निश्चप्रचं वक्तुं शक्यते यत् राजा वस्तुतो राजा नास्ति अपितु स धर्मदण्डस्याधीने भवति। धर्मदण्ड एव वास्तविकरूपेण राजा वर्तते। स एव नेता, शासकः, स एव सर्वेषामपि आश्रमाणां धर्मस्य च प्रतिभूः वर्तते। दण्ड एव सर्वेषां प्रजानां शासकः, सर्वेषां रक्षकः तथा सर्वेषां प्रजानां शयने सति दण्ड एव तेषां रक्षणं करोति। दण्डमेव विद्वांसः धर्म इति स्वीकुर्वन्ति, अस्मिन् एव विषये मनुस्मृतौ प्रतिपादितमपि वर्तते यथा –

---

[19] **मनुस्मृतिः 7.105**
[20] **मनुस्मृतिः 7.14**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

''स राजा पुरुषो दण्डः स नेता शासिता च सः।

चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः।।

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।

दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।[21]''

नृपादपेक्षा भवति जनानां यत् स न्यायं करिष्यतीति। प्राचीनकाले नृप एव मुख्यन्यायाधीशः भवति स्म, तस्मादेव तस्य प्रमुखं दायित्वमासीत् न्यायव्यवस्थायाः सम्पादने सत्यस्यैवानुकरणं कर्तव्यम्। भावुकताया आधारेण न्यायः कदापि न कर्तव्यः, अपितु सत्याधारेण, साक्ष्याधारेण, देशाधारेण, कालाधरेण च न्यायः कर्तव्यम्। तदैव नृपः स्वधर्मं पालयति तदाह स्वयमेव मनुः –

''सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः।

देशं रूपं च कालं च व्यवहारविधौ स्थितः।।[22]''

प्रजां प्रति स्वकर्तव्यानां सम्पादनाय नृपः दैनिककार्यक्रमस्य तालिकां निर्माय समस्तान्यपि कार्याणि कुर्यात्। तत्र मनुना दैनिककार्याणां संकेतमपि विहितं वर्तते। यथा प्रातःकालीनकार्येषु स्नानम्, ध्यानम्, अध्ययनम्, पूजा, हवनम्, सभायां प्रवेशं कृत्वा तत्र स्थितानां प्रजानां समीचीनप्रकारेण सन्तुष्टिं कृत्वा सभायाः विसर्जनं कुर्यादिति। स्वमन्त्रिपरिषदः मन्त्रणा, राजदूतेन सह गुप्तचरेण सह विचारविमर्श इत्यादीनि। तथैव सैनिकार्याणां विवरणमेवं वर्तते – व्यायामः, स्नानम्, विश्रामः तथा गृहकार्यस्यावलोकनम्, सेनायाः युद्धकार्यस्य च निरीक्षणम्, गुप्तसेवाविभागेन सह परामर्श इति।

---

[21] **मनुस्मृतिः 7.17–18**
[22] **मनुस्मृतिः 8.45**

ISSN: 0474-9030

Vol-67-Issue-5-September-2019

उपर्युक्तवर्णनेन ज्ञायते यत् राज्ञः गुणास्तु स्मृतिशास्त्रे पुराणशास्त्रे च स्वस्वकालानुसारेण भिन्नाः भिन्नाः प्रोक्ताः सन्ति, तथैव तेषां दायित्वमपि तत्तच्छास्त्रेषु भिन्नभिन्नरूपेणोपलभ्यते। परन्तु अन्ते तु एतदेव वक्तुं शक्यते यत् नृपस्य प्रमुखविषयस्तु दण्ड एवास्ति। यतो हि मनुस्मृत्यनुसारेण दण्ड एव धर्मोऽस्ति, दण्ड एव राजा चास्ति इति शम्।